# देवालयवास्तुशास्त्रदृशा शिवलिङ्गलक्षणविमर्शः

कंचन तिलवानी*
डॉ.उपेन्द्रभार्गवः**

**सारांशः -**

प्रस्तुतशोधपत्रे शिवलिङ्गलक्षणविमर्शः कृतः। अत्र शिवलिङ्गस्य तात्त्विकं दार्शनिकं आगमिकं वास्तुशास्त्रीयस्वरूपं च सम्यक् विवेचितम् । शिवलिङ्गशब्दस्य व्युत्पत्तिः तस्य प्रतीकार्थः शिवतत्त्वेन सह अभेदसम्बन्धः पुराणेषु प्रतिपादितं लिङ्गमहत्त्वं च निरूपितम्। एतदर्थं लिङ्गपुराणस्कन्दपुराणयोः वास्तुग्रन्थेषु च वर्णितानां विविधलिङ्गभेदानां तेषामाकारप्रमाणानां निर्माणविधेः स्थापत्यनियमानां च विशदं प्रतिपादनम् अत्र दृश्यते। शिवलिङ्गस्य निष्कलसकलमिश्ररूपाणां व्याख्यया सह प्रतिमाशास्त्रीयविवेचनं कृतम्। प्रतिमानिर्माणार्थं शिलालक्षणवर्णभेदलिङ्गलक्षणलिङ्गस्थानादीनां लिङ्गस्थापनफलादीनामप्यध्ययनं समाविष्टम्। शिवलिङ्गं ब्रह्माण्डीयसृष्टितत्त्वस्य शिवस्य निराकारब्रह्मस्वरूपस्य भारतीय स्थापत्यपरम्परायाश्च गूढप्रतीकमस्ति।

**कुञ्जीशब्दाः** - शिवलिङ्गम्, लिङ्गलक्षणम्, प्रतिमालक्षणम्, शिवतत्त्वम्, स्वयम्भूलिङ्गम्, लिङ्गभेदाः, शिलालक्षणम्, मयमतम्, अपराजितपृच्छा, स्थापत्यम्, अवन्तिखण्डः, आगमशास्त्रम्, वायुसंहिता, वास्तुशास्त्रम्।

---

**प्रस्तावना -**

भारतीयसंस्कृतौ देवप्रतिमानां, देवालयानां तथा पूजाविधानानां विशिष्टं महत्त्वं दृश्यते। तेषु शिवोपासना प्राचीनधार्मिकपरम्परासु अन्यतमा अस्ति। भगवान् शिवः भारतीयदर्शनपरम्परायां निराकारब्रह्मस्वरूपेण सृष्टिस्थितिसंहारकर्तृरूपेण तथा कल्याणस्य परमप्रतीकरूपेण प्रतिष्ठितः। तस्यैव प्रतीकरूपं *शिवलिङ्गम्* इति परिगण्यते। 'लिङ्ग'शब्दस्य सामान्यतः प्रतीकं चिह्नं सङ्केतं वा इत्यर्थाः स्वीकृताः किन्तु शैवपरम्परायां तस्य आध्यात्मिकं दार्शनिकं च स्वरूपं अत्यन्तं व्यापकं दृश्यते। वेदोपनिषत्पुराणागमेषु वास्तुशास्त्रग्रन्थेषु च

शिवलिङ्गस्योत्पत्तिः तत्स्वरूपं तद्भेदाः पूजाविधानं स्थापत्यनियमाः च विस्तरेण प्रतिपादिताः सन्ति। लिङ्गस्य न केवलमाध्यात्मिकमहत्त्वं वर्तते अपि च तस्याकारपरिमाणे निर्माणद्रव्यं शिलालक्षणादीनि भारतीयशिल्पपरम्परायाः वैज्ञानिकदृष्टिकोणं प्रकाशयन्ति।

**1. लिङ्गशब्दार्थः तन्महत्वञ्च -**

प्रायः लिङ्गशब्दः स्त्रीपुरुषयोः विभेदवाचकत्त्वं सूचयति। शब्दकोशग्रन्थे लिङ्गशब्दस्यार्थः "प्रतीकम्" इति विद्यते। लिङ्गम्(नपु.)अर्थात् शिवः (प्रतीकम्) पिण्डी वा लिङ्गरूपेण वा शिवः पूज्यते इत्यर्थः।[1] कोशग्रन्थेषु लिङ्गशब्दप्रयोगः शिवलिङ्गरूपेण व्याख्यातः। (शी + वन्) अर्थात् शमयति पापं येन पापानि नश्यन्ति इत्यर्थ।[2] शिवस्य शुभं माङ्गलिकं शुभार्थे अत्र प्रयुक्तम्। शिवस्य अर्थः कल्याणं लिङ्गस्य अर्थः प्रतीकं वा। अतः शिवलिङ्गस्य अर्थः कल्याणस्य प्रतीकः इति। वेदेषु शिवः रुद्रदेवः आदिदेवः सर्वदेवः इत्यादिभिः संज्ञाभिः प्रशंसितः। उपनिषत्सु परमशिवः ब्रह्म इति मन्यते शिवः ज्योतिर्मय इति अपि व्यञ्जते। पुराणेषु शिवस्य स्वप्रकाशस्वरूपस्य पुष्टिः कृता। वायुसंहितायां शिवमहिमविषये कथ्यते यत् शिवः कालसीमादिविहीनः कालखण्डः। स च गुरूणामपि गुरुः। अस्मात् शिवस्य ज्योतिःस्वरुपं स्फुटं भवति। विद्येश्वरसंहितायां शौनकादिऋषीणां लिङ्गपूजनस्य कारणज्ञानप्रसङ्गे उक्तं यत् शिवः एकोऽपि द्विविधः इति। प्रथमं शुद्धं (निष्कलम्) द्वितीयं सकलं (स्थूलम्)। एतेषु शिवस्य निराकाररूपस्य स्वरुपं नासीत् अतः निराकारलिङ्गमेव शिवस्य स्थूलरुपं विद्यते इति कारणात् तस्य मूर्त्तरूपस्य पूजा भवति इति। शिवः ब्रह्मरूपः लिङ्गरुपेण पूज्यते। महाभारते महर्षिव्यासः मूर्तिपूजायाः स्थाने लिङ्गपूजायाः महत्वं अकथयत्। सर्वेषु देवदेवरूपेषु शिवः वर्तते अतः ईश्वरः लिङ्गरुपेण पूज्यते। वेदे असौ रुद्रनाम्ना ज्ञायते। यस्मिन् सर्वे भूताः लीनाः भवन्ति यस्मात् पुनः उद्भवन्ति अतः शिवलिङ्गं परमशिवस्य सम्यक् रूपमस्ति। अतः भगवतः शिवस्य लिङ्गहीनरूपस्य पूजा अनादिकालात् जगति प्रचलिता अस्ति।

**2. लिङ्गरूपशिवतत्त्वयोरभेदः -**

लिङ्गपुराणे लिङ्गशिवतत्त्वरूपसम्बन्धे उक्तं यत् निर्गुणनिराकारब्रह्मशिव एव लिङ्गमूलकारणं लिङ्गस्वरूपमपि। शब्दस्पर्शरूपरसगन्धादिरहिततत्त्वमेव शिव इति। शब्दस्पर्शरूपरसगन्धादियुक्ता प्राथमिकप्रकृतिः उत्तमलिङ्गम् इति उच्यते। तत् जगतः उत्पत्तिकारकम्। पञ्चभूतात्मकं लिङ्गमेव स्थूलसूक्ष्मभेदाभ्यां जगतः देवता निर्गुणदिव्यशिवात् एव उत्पन्नः। आदितः पञ्चमहाभूतपर्यन्तं सर्वाणि तत्त्वानि अण्डात् उत्पन्नानि भवन्ति। अस्मिन् सृष्टौ कोटि कोटि अण्डानां स्थितिविषये उक्तं यत् प्रधानाकृति एव सदाशिवाश्रये कोटिकोटिब्रह्माण्डेषु सर्वत्र ब्रह्माविष्णुशिवचतुर्मुखानि च सृजति। महेश्वर एव अस्य जगतः सृजकः परिपालकः नाशकश्च। स एव महेश्वरः क्रमेण त्रिषु रूपेषु भूत्वा ब्रह्माण्डस्य निर्माणं कुर्वन् रजोगुणे

[1]सं.हि.श.को.(वा.शि.आ.) पृ. – 1045
[2]सं.हि.श.को.(वा.शि.आ.) पृ. – 1044

पालनावस्थायां तिष्ठति सत्वगुणे तिष्ठति प्रलयकाले तमोगुणेन तिष्ठति। स एव भगवान् शिवः प्रजापतिः पालकः विनाशकश्च ।[3]

**3. लिङ्गभेदाः -**

शिवलिङ्गानां विषये तेषामाकारप्रकारविषये पुराणपरम्परासु वास्तुग्रन्थेषु तत्समम्बद्धग्रन्थेषु च विस्तरेण वर्णनं प्राप्यते। अग्निपुराणानुसारं शिवलिङ्गस्य 15400 भेदाः सन्ति। आदित्यपुराणे सूतसंहितायां च स्व्यम्भूलिङ्गं गिरिलिङ्गं त्र्यम्बकादिलिङ्गं ज्योर्तिलिङ्गं स्थललिङ्गं जललिङ्गं वरुणेश्वरादीनां वर्णनं च लभ्यते। शिवपुराणस्य विद्येश्वरसंहितायां वर्णभेदानुसारं लिङ्गभेदवर्णनं विद्यते। यथा च -

1) ब्राह्मणानां कृते - रसलिङ्गम् (पारदम्)
2) क्षत्रियाणां कृते - बाणलिङ्गम्
3) वैश्याणां कृते - स्वर्णलिङ्गम्
4) अन्येषां कृते - शिलालिङ्गम्
5) स्त्रीणां कृते - पार्थिवलिङ्गम्
6) विधवाः निवृत्तिमार्गिणाम् - पारदम्
7) गृहस्थस्थानां कृते - स्फटिकम्

इदमपि उक्तं यत् एताद्दशं रुपं न लभ्यते तर्हि कस्यापि रूपस्य पूजनं कर्तुं शक्यते। अवन्तिकानगरमहाकालवनक्षेत्रे स्थितानामेतेषां चतुरशीतिलिङ्गानामस्तित्वप्रमाणं स्कन्दपुराणस्य अवन्तिखण्डे प्राप्यते अस्य विस्तृतविमर्शः पूर्वाध्याये प्रस्तुतः। वास्तुशास्त्रग्रन्थेषु अपराजितपृच्छानुसारं शिवलिङ्गानां 14420 प्रकाराः वर्णिताः सन्ति। तदनुसारं पाषाणस्य शिवलिङ्गं न्यूनातिन्यूनम् एकहस्तात् अधिकतमं नवहस्तपर्यन्तं भवितुम् अर्हति तथा च हस्तस्य मापनानुसारं लिङ्गस्य श्रेष्ठतायाः सम्बन्धे उक्तम्[4] -

| **मानम्** | **लिङ्गाकारः** | **प्रासादानुसारं लिङ्गमानम्** |
|---|---|---|
| ज्येष्ठः | ¼ | 9 हस्ताः 36 हस्तेषु |
| मध्यमः | 1/5 | 9 हस्ताः 45 हस्तेषु |
| कनिष्ठः | 1/6 | 9 हस्ताः 54 हस्तेषु |

[3]सर्गस्य प्रतिसर्गस्य स्थितेः कर्ता महेश्वरः।।
सर्गे च रजसा युक्तः सत्त्वस्थः प्रतिपालने।(लि.पु. पू.भा. - 4.35)
[4]अप.पृ. - 202.7

एतेषु त्रषु 1/4 हस्तं योजयित्वा सकल 33 प्रकाराणां शिवलिङ्गस्य परिमाणस्य वर्णनं भवति। तेषां परिमाणानुसारं नामकरणं भवति इति। अपराजितपृच्छायां[5] विस्तरेण एतेषां भेदानां वर्णनं विहितम्।

| | | | |
|---|---|---|---|
| 1) | एकहस्तः | - | भवः |
| 2) | एकचतुर्थांशहस्तः | - | भवोद्भवः |
| 3) | सार्धहस्तः | - | भावः |
| 4) | अर्द्धद्वयहस्तः | - | संसारभयनाशनः |
| 5) | द्वे हस्ते | - | पाशयुक्तः |
| 6) | द्वौ चतुर्थांशहस्तौ | - | महोतजः |
| 7) | सार्धद्वयहस्तः | - | महादेवः |
| 8) | चतुर्थांशतः त्रयः हस्ता यावत् | - | परात्परः |
| 9) | त्रय हस्तौ | - | ईश्वरः |
| 10) | त्रिचुतुर्थांशहस्तः | - | शेखरः |
| 11) | सार्धत्रिहस्तः | - | शिवः |
| 12) | चतुर्थांशतः चतुर्हस्तपर्यन्तं | - | शान्तः |
| 13) | चतुःहस्तः | - | मनोहलादकः |
| 14) | चतुर्थांशहस्तः | - | रुद्रतेजः |
| 15) | सार्धचतुः हस्तः | - | सदात्मकः (सघोजात) |
| 16) | चतुर्थांशतः पञ्चहस्तपर्यन्तं | - | वामदेवः |
| 17) | पञ्च हस्ताः | - | अघोरः |
| 18) | चतुर्थांशः पञ्चहस्तः | - | तत्पुरुषः |
| 19) | सार्धपञ्च हस्तः | - | ईशानः |
| 20) | चतुर्थांश षट् हस्ताः | - | मृत्युंजयः |
| 21) | षड् हस्ताः | - | विजयः |
| 22) | चतुर्थांशः हस्तः | - | किरणाक्षः |
| 23) | सार्धषड्हस्तम् | - | अद्याशस्त्रः |
| 24) | चतुर्थांशतः सप्तहस्तपर्यन्तं | - | श्रीकण्ठः |
| 25) | सप्त हस्ताः | - | पुण्यवर्धनः |
| 26) | चतुर्थांशः सप्त हस्तम् | - | पुण्डरीकः |
| 27) | सार्धसप्त हस्तं | - | सुवक्रः |
| 28) | चतुर्थांशतः अष्टहस्तपर्यन्तं | - | उमातेजः |

[5]तत्रैव - 201.7

| | | |
|---|---|---|
| 29) अष्ट हस्तः | - | विश्वेश्वरः |
| 30) अष्टचतुर्थांशहस्तम् | - | त्रिनेत्रं |
| 31) सार्द्धअष्टहस्तः | - | त्र्यम्बकं |
| 32) चतुर्थांशनवहस्तः | - | घोरः |
| 33) नव हस्ताः | - | महाकालः[6] |

एतत् केवलं स्थूलमनुमानम् एव। सूक्ष्मस्तु 14420 तः अधिकाः आकाराः प्रकाराः च भविष्यति।[7] तेषां विषयः सूतसंहितायाः आदित्यपुराणे च विस्तरेण प्राप्यते। अवन्तिका इति शिवस्य नगरम्। अत्र असंख्याकाः शिवलिङ्गाः सन्ति। तेषां आकारप्रकाराः भिन्नाः सन्ति। सर्वेषां भिन्नानि नामानि सन्ति। तेषां विस्तृतं वर्णनं स्कन्दपुराणे अवन्तिखण्डे प्राप्यते। इदं शिवलिङ्ग स्थिरं एवं चर (परिवर्तनशीलं) च द्विविधं केवलं शिवलिङ्गस्य चररुपाणि नगरभ्रमणार्थं प्रस्थायन्ते। (परिवर्तनशीलरुपेण) चररूपेण अपि शिवस्य स्थूलं वा शारीरिकं वा रुपं नगरं भ्रमणार्थं बर्हिः गृह्यते परन्तु शिवलिङ्ग न। एतत् स्थूलरुपं प्रायः धातुनिर्मितम् अस्ति। तथा च सामर्थ्यानुसारं धातुरत्नस्य पाषाणस्य वा भवितुम् अर्हति। लिङ्गानां देवप्रतीकानां विस्तरेण प्रतिपादनं विशेषेण मयासुराचार्येण कृतम्। तन्मतेन मयमते त्रयस्त्रिंशतमे अध्याये कृतम्। तत्र लिङ्गानां त्रयः भेदाः कथिताः[8] -

| | | |
|---|---|---|
| 1) निष्कलम् | - | ईश्वरप्रतीकम् |
| 2) सकलम् | - | आकारयुक्तप्रतिमा |
| 3) मिश्रम् | - | मुखलिङ्गयोः मिश्ररूपम् |

- **<u>प्रतिमानिर्माणार्थं शिलालक्षणम्</u> -**

वर्णानुसारं मूर्तिनिर्माणार्थं शिलालक्षणम् उक्तम्[9]। तद्यथा -

| | | |
|---|---|---|
| 1) ब्राह्मणां कृते | - | श्वेतः |
| 2) क्षत्रियाणां कृते | - | रक्तः |
| 3) वैश्याणां कृते | - | पीतः |
| 4) शूद्राणां कृते | - | कृष्णः |

शिलासमानवर्णा स्थूलस्पर्शमृदुसुनिहितभूमौ भवेत्। द्रष्टुं सुन्दरं युवां च भवितुम् अर्हति। यथायोग्यदीर्धतायाः विस्तारस्य च भवेत्।तत्रैव शिलाभेदा अपि कथिताः। ते च -

1) पुरुषशिलाः(पुंशिला)
2) स्त्रीशिला
3) षण्ढः(नपुंसक)

---

[6]अप.पृ. - 201.8-12
[7]तत्रैव - 201.18
[8]म.म. – 33.1
[9]तत्रैव – 4-18

स्थूलं निष्कलं मिश्रप्रतिमा च पुंशिलायाः कार्येत्। स्त्रीमूर्तिः स्त्रीशैल्याः उपयोगेन निर्मातव्या। कुर्मशिला वा नन्यावर्तशिला व षण्ढशिला कार्या।[10] पुंशिला स्त्रीशिलाः एवं षण्डशिला च वर्णनं मानसारग्रंथे अपि प्राप्यते।[11] मयमतम् ग्रंथे लिङ्गभेदान् एवं व्याख्यतव्यम्[12]

1. सर्वतोभद्रलिङ्गम्
2. वर्धमानलिङ्गम्
3. शम्भूभागाधिकलिङ्गम्
4. स्वस्तिकलिङ्गम्

अग्रे अपि भेदाः कृताः। ते च यथा –

1. सुरार्चितलिङ्गम्
2. धारालिङ्गम्
3. साहस्रलिङ्गम्
4. त्रैराशिकलिङ्गम्

- **आर्षलिङ्गम् –** चतुर्विधं लिङ्गं ऋणीनां पक्षे प्रकीर्तितम्।[13]

1. सस्थूलमूललिङ्गम्
2. यवमध्य लिङ्गम्
3. पिपीलिकामध्यलिङ्गम्
4. शिरः स्थूललिङ्गम्

- **स्वयम्भूलिङ्गम् –**

स्वयम्भूलिङ्गस्याकारः द्विकोणपञ्चकोणस्त्रिकोणैकादशनवषष्ठसप्तद्वादशकोणात्मकः भिन्नकोणात्मको वा भवितुमर्हति। एतेषां मानं नियतं नास्ति न च तेषां नियतप्रमाणमपि विद्यते। स्वयम्भूलिङ्गमिदं जीर्णं छिद्रयुक्तं अस्पष्टवर्णमपि भवितुं शक्नोति। अस्य पूजाभागः उच्चनीचः भवितुमर्हति। इदं कुटिलं ऋजुं वा रेखाचिह्नबिन्दुयुक्तं रेखायुक्तं वा भवितुं शक्नोति। स्वयंम्भूलिङ्गानामाद्यं रूपं शुद्धं प्राकृतिकं च भवति। अज्ञानात् मूललिङ्गानां परिवर्तनं दोषपूर्णम्।[14]

- **स्फटिकलिङ्गम् –** एतानि त्रिविधानि भवन्ति – लघुमध्यमोत्तमानि च।[15] तद्याथा -

1. **लघुलिङ्गम्** – पूजाभागस्य ऊर्ध्वता 1 अङ्गुलतः 6 अङ्गुलपर्यन्तं भवति।
2. **मध्यमलिङ्गम्** – अस्मिन् पूजनीयभागस्य ऊर्ध्वता 7 तः 12 अङ्गुलपर्यन्तं आरभ्यते।

---

[10] म.म. - 10.11

[11] मा.सा. - 52.87-92

[12] म.म. - 33.72-73

[13] म.म. 33. 85-86

[14] म.म. - 33.87-91½

[15] म.म. - 33.144-147½

3. **उत्तमलिङ्गम्** – अस्मिन् पूजाभागस्य ऊर्ध्वता 6 प्रकारः भवति। 13 भागात् 18 भागपर्यन्तं आरभ्यते।

- **मृण्मयादिलिङ्गानि –** मृतिकया निर्मितं लिङ्गं कठोरं मृदुर्वा भवति यथाकामम्। काष्ठलिङ्गं निर्दोषं कारयेत्। धातुमयं लिङ्गं कठोरं भवेत्।[16]
- **मणिलिङ्गम्** – शिलाभिन्नं लिङ्गं मणिलिङ्गं कथ्यते। रेखाबिन्द्वादिविवर्णानि मक्षिकाकाकपदादीनि चिह्नयुक्तानि विवरयुक्तानि च सर्वथा त्यक्तव्यानि इति।[17]
- **लिङ्गलक्षणम् –** लिङ्गस्य ऊर्ध्वतायाः त्रयः भागाः सन्ति। मूले ब्रह्मणो भागः चतुष्कोणः। मध्ये वैष्णवभागः अष्टकोणः ऊर्ध्वभागः शिवस्य कृते वृत्तः। अयं भागः पूज्यभाग उच्यते अयं भागः दृश्यः।[18]
- **लिङ्गस्थानम्** – लिङ्गप्रमाणेन देवालयः देवालयप्रमाणेन लिङ्गप्रमाणं च निर्धारितं भवेत्। गर्भमध्ये वामभागे ईशानकोणाश्रयं कृत्वा पूजनीयं लिङ्गं स्थापयेत्।[19]
- **लिङ्गस्थापनफलम्** – लिङ्गस्थापनविषये कथ्यते यत् अधिष्ठानस्य निर्माणे बृहत् लिङ्गं स्थापनीयं मन्दिरस्य अर्धनिर्माणे मध्यमलिङ्गं स्थापयितव्यं मन्दिरस्य समाप्तिसमये लघुलिङ्गं स्थापनीयम्। समुचितं विधियुक्तं लिङ्गं स्थापयित्वा श्रीसौभाग्यारोग्यभोगं च प्रार्थयेत्। यदि च संस्थापनं नियमविधानानुसारं न क्रियते तर्हि संस्थापकस्य विपत्तिहेतुर्भूत्वा नित्यं व्याधिशोककारकं भवति।[20]

अधुना मन्दिराणां नगरादिशैल्या नागरद्रविड़वेसरेत्यादीनां लिङ्गप्रकाराणामपि वर्णनं क्रियते। तद्यथा-

- **नागरशिवलिङ्गम्** – नागरमन्दिरे नागरप्रमाणेन लिङ्गप्रमाणमुक्तम्। गर्भविस्तारानुगुणं लघुतमं शिवलिङ्गं प्रमाणार्धम्। उत्तमं बृहत् शिवलिङ्गं 3 भागसदृशं भवति यदा गर्भस्य विस्तार: 5 भागेषु विभक्त: भवति। एतयोः 8 भागेषु विभज्य 9 शिवलिङ्गानि क्रियन्ते। शिवलिङ्गस्य उत्तमाः मध्यमाः कनिष्ठाः च भेदाः सन्ति तेषु प्रत्येकस्मिन् अपि त्रयः भेदाः सन्ति। एतेषां लिङ्गानाम् विस्तारः 5 4 वा तेषां 16 भागानां तृतीय भागः। एते नगरभेदे पौष्टिकाः जयदः सार्वत्रिकाः च इति उच्यन्ते।[21]
- **द्राविडलिङ्गम्** – लघुतमद्राविडलिङ्गस्य ऊर्ध्वता द्रविडगर्भस्य 21 भागानां दशमांशस्य तुल्यम् अस्ति। श्रेष्ठलिङ्गस्य च ऊर्ध्वता 13 भागसदृशी भवति। एतयोः भेदः यथायोग्यं

---

[16]म.म. - 33.153-155

[17]म.म. - 33.160

[18]म.म. - 33.67

[19]म.म. - 33.37-38½

[20]म.म. - 33.161-162

[21]म.म. - 33.40 – 43 ½

विभक्तव्यः। द्रविडसमूहस्य जयादादीनां ऊर्ध्वता 6 5 एवं 21 भागेषु 4 भागानां समं भवति ।[22]

- **वेसरलिङ्गम्** – वेसरमन्दिरस्य 25 भागेषु विभज्य 13 भागेभ्यः लघुतमं लिङ्गं निर्मीयते। बृहत्तमं लिङ्गं 16 भागपर्यन्तं ऊर्ध्वं भवति। तेषां मध्यभागं 8 भागेषु विभज्य 9 लिङ्गाः पूर्ववत् निर्मीयन्ते। वेसरलिङ्गंस्य जयादादि भेदानाम् ऊर्ध्वता 8 7 6 भागसमं भवति। सर्वविधलिङ्गविस्तारस्य परिधिः 16 मध्ये 5 भागसमं भवति ।[23]

**सन्दर्भग्रन्थसूची -**


1. संस्कृत हिन्दी कोश, वामन शिवराम आप्टे, न्यू भारतीय बुक कार्पोरेशन, दिल्ली 2004
2. स्कन्दपुराण (अवन्तीखण्ड), वेदव्यास, चौखम्बा, संस्कृत, सीरीज, वाराणसी, 2015
3. लिङ्गपुराण, वेदव्यास, गीताप्रेस गोरखपुर, सं. 2080
4. श्रीमद्भागवतमहापुराण, वेदव्यास, गीताप्रेस, गोरखपुर वि.स. 2020
5. मत्स्यपुराण, वेदव्यास चौखम्बा सुरभाजी प्रकाशन वाराणसी, 2015
6. गरुड पुराण, वेदव्यास, चौखम्बा, संस्कृतसंस्थान, वाराणसी, वि.सं. 2072
7. मयमतम्, डॉ. शैलजा पाण्डेय, चौखम्बा, पब्लिशिंग हाउस नई दिल्ली, 2013
8. अपराजितपृच्छा, डॉ. श्रीकृष्ण ‘जुगनु’, परिमल पब्लिकेशन, दिल्ली, 2011
9. उज्जयिनी और महाकाल, डॉ. भगवतीलाल राजपुरोहित, प्राच्य विद्या निकेतन, ब्रजमोहन बिरला रिसर्च सेन्टर, उज्जैन 1992।
10. श्रीविशाला उज्जयिनी, भगवतीलाल राजपुरोहित, महाराजा विक्रमादित्य शोधपीठ, उज्जैन।


*शोधार्थी (ज्योतिष विभाग), महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन (मध्य प्रदेश)।
**शोधनिर्देशक, सहायक आचार्य एवं विभागाध्यक्ष (ज्योतिष विभाग), महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन (मध्य प्रदेश)।

[22]म.म. - 33.43 ½ - 44 ½

[23]म.म. - 33. 45 ½ - 48 ½